२० । "इष्टिभिः पशुबन्धैश्च चातुर्मास्यैस्तथैव च । अग्निष्टोमादिभिर्यज्ञैर्येन चेष्टं स इष्टवान्" व्यासोक्ते ४इष्ट्यादिकारिणि त्रि०। स्त्रियां ङीप् ।

**इष्टव्रत** त्रि० इष्टं व्रतं यस्य । १व्रतशीले इष्टानि कल्याणानि व्रतानि कर्म्माणि सिध्यन्ति येन। २इष्टकर्म्मसाधने अन्नादौ "इष इष्टव्रता अकः" ऋ० ३,५९,९ । "इष्टानि कल्याणानि व्रतानि कर्माणि याभिः सिध्यन्ति ता इषः अन्नानि" भा० ।

**इष्टसाधन** न० ६त० । अभीष्टसाधने इच्छाशब्दे उदाहृतिः । ततो भावे त्व । इष्टसाधनत्व तद्भावे न० । तल् । इष्टसाधनता तद्भावे स्त्री ।

**इष्टा** स्त्री इज्यतेऽनया यज—करणे बा० क्त । शमीवृक्षे राजनि० तत्समिधा हूयते इति तस्याः तथात्वम् कर्म्मणि क्त । अभिमतायां स्त्रियाम् ।

**इष्टाकृत** त्रि० अनिष्टमिष्टं कृतम् इष्ट+च्व्यर्थे डाच् कर्म्मणि क्त । इष्टीकृते "सतामिष्टाकृतं नाम पूर्व्ववरसहस्रिकम्" रामा० ।

**इष्टादि** पु० "इष्टादिभ्यश्च" पा० सूत्रेण तत्तद्गमनेनेत्यर्थे विहितेनिप्रत्ययनिमित्तभूतशब्दसमूहे स च गणः । "इष्ट पूर्त्त उपसादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्च्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित" आकृतिगणत्वेन "हठेन पठितो मास्मिन् खलः खेलतु" नैष० ।

**इष्टापत्ति** स्त्री ६त० कर्म्मधा० वा । १इष्टस्यापत्तौ इष्टायामापत्तौ च वादिना दर्शितापत्तेः प्रतिवादिन इष्टत्वे हि सा भवति । "इष्टापत्तौ दोषान्तरमाह" जग० ।

**इष्टापूर्त्त** न० इष्टं च पूर्त्तञ्च द्वयोः समाहारः पूर्वपददीर्घः । इष्टशब्दोक्ते अग्निहोत्रादौ "वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते" इति मनूक्ते पूर्त्ते च । "वितथन्तु वदेयुर्ये धर्म्मं प्रह्लाद पृच्छते। इष्टापूर्त्तञ्च ते घ्नन्ति सप्त सप्तपरावरान्" भा० स० ६८अ० । "इष्टापूर्त्तेन च तथा वक्तव्यमनृतं न तु" आ०प०१६५अ०। "इष्टापूर्त्तफलं न स्याद्व शिष्यो न गुरुर्भवेत्" भा०व०२२अ० । क्वचित् इतरेतरद्वन्द्वोऽपि द्वि०ब० । "इष्टापूर्त्ते संसृजेथामयञ्च" यजु० १०,५४।

**इष्टार्थोद्युक्त** त्रि० इष्टे अर्थे उद्युक्तः । उत्सुके इष्टार्थलाभाय त्वरमाणे कालासहिष्णौ ।

**इष्टाश्व** त्रि० इष्टोऽश्वोयस्य । १प्रियहये २राजभेदे पु० । "किमिष्टाश्व इष्टरश्मिरेतैः" ऋ०१,१२२,१३ । "इष्टाश्व एतन्नामको राजा" भा० ।

**इष्टि** स्त्री यज—क्तिन् । १यागभेदे । स च कात्या०श्रौ०सू० दर्शितः "कर्मशब्दो द्रव्यदेवतायुक्तो यजतिः"। ४,३,१,सू० "क्रियाशब्दः आख्यातप्रत्ययान्तो निर्वपत्यादिशब्दो यजतिः प्रत्येतव्यः यागो ह्येष इत्यर्थः न निर्वापालम्भादिरूपसंस्कारमात्रविधायकः यजतिशब्दोऽत्र तदर्थयागपरः । एवं यागत्वे सिद्धेऽपि इदं संदिह्यते सौर्यं चरुं निर्वपेदग्निषोमीयमजमालभेतेत्यादौ किं यागमात्रं भवति उत धर्मा अपि भवन्तीति यदा च धर्मा भवन्तीति पक्षस्तदापि संदेहः किं पूर्णाहुतिसम्बन्धिनो धर्मा भवन्ति उताग्निहोत्रसम्बन्धिनः, आहोस्विद्दर्शपूर्णमासयोः, अथवा ज्योतिष्टोमस्येति, अथवा दर्शपूर्णमासयोरेवेति, । धर्माणामनाम्नानाद्यथाश्रुतं यागमात्रं कर्तव्यमिति प्राप्ते आह" क०"दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात्" २सू०। सौर्यादौ धर्मा भवन्ति न यागमात्रम् एवमेतानि विधिवाक्यानि समर्थान्यर्थवन्ति सप्रयोजनानि भवन्ति अन्यथा साकाङ्क्षत्वादर्थप्रतिपादनाभावेन निरर्थकान्येव स्युः । तथा हि सौर्येण यागेन ब्रह्मवर्चसं भावयेदित्यत्रांशत्रयवती भावना विधीयते किम्, केन, कथमिति, किमंशो ब्रह्मवर्चसम्, तत्र केनांशः सौर्येणेति, कथमंशस्तु वाक्यमध्ये नास्ति तेन कथं भावयेदिति वाक्यं कथमंशसापेक्षम् । यच्च सापेक्षं भवति तदध्याहारेणानुषङ्गेण वा पूरयित्वा निराकाङ्क्षं कर्तव्यम् । अन्यथा तस्यानर्थक्यापत्तेः न च वेदे मात्रामात्रस्य तदिष्यते तस्मादत्र निराकाङ्क्षीकरणाय विध्यन्तेतिकर्तव्यतापरपर्यायः कथमंशोऽत्र कश्चिदनुषञ्जनीय इति सिद्धे आह "दर्शपूर्णमासधर्म्मा इष्टिपशुषु सामर्थ्यादिति" सर्वासु इष्टिषु अग्नीषोमीये पशौ च दर्शपूर्णमासयोरेव धर्मा भवन्ति सामर्थ्यात् पूर्वोक्त एव हेतुरत्रापि योज्यः । दर्शपूर्णमासधर्मा एव सौर्यादिविधीनां शेषीभवितुं समर्थाः चरुपुरोडाशादयो ह्यवघातादिभिरेव सिध्यन्ति नाभिषवादिभिरिति । इष्टिपशुष्विति इष्टिषु सर्वासु अग्नीषोमीये पशौ च पश्वन्तरेषु ह्यग्नीषोमीयधर्मा भवन्ति" क० । इत्यारभ्य पञ्चविंशत्या सूत्रैस्तद्विशेष उक्तस्तत विस्तरेणावसेयः । तथा च दर्शपौर्णमासेतिकर्तव्यताको यागभेद इष्टिरु-